International Journal of Sanskrit Research 2019; 5(5): 227-232

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 227-232
© 2019 IJSR
www.anantaajournal.com
Received: 13-09-2019
Accepted: 23-10-2019

**डॉ. दीपक कालिया**
ज़ाकिर हुसैन, दिल्ली कालेज
दिल्ली विश्वविद्यालय, दिल्ली
भारत

Corresponing Author:
**डॉ. दीपक कालिया**
ज़ाकिर हुसैन, दिल्ली कालेज
दिल्ली विश्वविद्यालय, दिल्ली
भारत

# आत्मप्रबन्धनं पंचतन्त्रस्य अपरीक्षितकारकतन्त्रञ्च-वर्तमानराजनीतिसन्दर्भे

**डॉ. दीपक कालिया**

प्रस्तावना
**जीवने सामाजिक-आर्थिक-राजनैतिक-अध्यात्मिक-इत्यादिषु क्षेत्रेषु सफलतायाः प्रमुखसाधनम् आत्मप्रबन्धनमेव। आत्मप्रबन्धनं मानवाय अत्यावश्यकम्। वर्तमानकाले आत्मप्रबन्धनं बहुचर्चितः विषयः। पञ्चतन्त्रे पं. विष्णुशर्मणा कथामाध्यमेन कोमलमतिराजकुमारान् प्रति ये उपेदशाः दत्ताः तेऽपि मूलतया आत्मप्रबन्धनविषये एव सन्ति। यथा अपरीक्षितकारकतन्त्रस्य पञ्चदशकथासु काम-क्रोध-मद-लोभादयः मानवस्य विनाशकारकाः एतदेव उपदिष्टम्। एतेषां निवारणेन एव आत्मप्रबन्धनम् संभवम्। प्रस्तुत शोधपत्रस्य मुख्यत्रयबिन्दवः- 1. आत्मप्रबन्धनम्, 2. अपरीक्षितकारकतन्त्रे आत्मप्रबन्धनम्, 3. वर्तमानराजनीतिसन्दर्भे समन्वयम् इति**

## आत्मप्रबन्धनम्

**आत्मनः प्रबन्धनम् इति "आत्मप्रबन्धनम्"। आंग्लभाषायां 'Self Management' इति कथ्यते। अत्र आत्मन् शब्दोऽयं स्वस्य वाचकः न तु जीवात्मनः, यतोहि "Self" इति शब्दः आत्मावाचकः न भवितुं शक्यते। "आत्मा" आंग्लभाषायां 'Soul' इति कथ्यते। अपरञ्च आत्मा तु निर्विकारः तस्य प्रबन्धनं कथं कर्तुं शक्यते? अतएव अत्र आत्मप्रबन्धनम् अर्थात् स्वस्य प्रबन्धनम्।**

**प्रबन्धनशब्दस्य प्रयोगः सामान्यतया 'प्रबन्ध' इति रूपेण क्रियते। वर्तमान शिक्षा क्षेत्रे "प्रबन्धनम्" इति विषयः अति महत्त्वपूर्णः सञ्जातः। प्रबन्धनविषये अनेकेषां-विदूषां मतानि एवमेव सन्ति-**

**विलियम एच. न्यूमैन (**William H. Newman**) महोदयः प्रबन्धस्य अर्थं वर्णनयन् अकथयत् यत् "कंचित् सामान्योद्देश्यं प्राप्तुं कस्यचित् जनस्य समूहस्य वा प्रयासानां मार्गदर्शनम्, नेतृत्वं नियंत्रणमेव च प्रबन्धनम् इति कथ्यते।**[1]

सी. डब्ल्यू. विल्सन (C.W. Wilson) महोदयेन लिखितम् यत् निश्चितोद्देश्यानां प्राप्तिः हेतोः मानवीय- शक्तिनाम् संचारणम् निदेशकप्रक्रिया च प्रबन्धम् कथ्यते।[2]

प्रो. थियो हेमन (Prof. Theo Hamiaun) महोदयेन "Professional Management Theory and Practice" इति नाम्निस्वपुस्तके प्रबन्धः त्रिषु प्रचलितार्थेषु प्रयुक्तः-[3]

प्रथमः अधिकारी-अर्थे (Management Personnel)

द्वितीयः विज्ञान-अर्थे (Management Science)

तृतीयः प्रक्रिया-अर्थे (Management Process)

परं प्रबन्धः शब्दोऽयं प्रक्रिया-अर्थे अति समीचीनम्। जार्ज आर. टैरी महोदयानुसारं "प्रबन्ध" एका पृथक् प्रक्रिया यस्याम् नियोजनम्-संगठनम् अभिपे्ररणम्, नियंत्रणम् च समाविष्टम् यस्य निष्पादनं मानवानां साधनानामुपयोगेन उद्देश्यान् निर्धारयितुं क्रियते।[4]

स्टेनले वेन्स (Stanley Vance) महोदयस्य शब्देषु प्रबन्धः पूर्वनिर्धारितानां लक्ष्यानां प्राप्तेः स्पष्टप्रयोजनार्थं निर्णयार्थं, मानवीयक्रियासु नियंत्रणार्थम् प्रक्रियामात्रवर्तते।[5] हेनरी फैयोल (Henri Fayol) मन्यते यत् प्रबन्धस्याभिप्रायः पूर्वानुमानम् योजनानिर्माणम्, संगठितकरणं, समन्वयकरणं नियंत्रणकरणम् चास्ति।[6]

अनेन विवेचनेन स्पष्टमिदं यत् वस्तुतः 'प्रबन्धनम्'सा विशिष्ट प्रक्रिया वर्तते यस्याम् नियोजनम्, संगठनम् समन्वयम्-, निदेशनम् अभिप्रेरणं नियंत्रणम् इति कार्याणि क्रियन्ते।

श्रीमद्भगवद्गीतायां श्रीकृष्णेन अर्जुनाय दत्ताः उपदेशाः अपि प्रबन्धप्रक्रियासम्बन्धिताः यतो हि तेषु- नियोजनम्, निदेशनम्, अभिप्रेरणं नियंत्रणं इति विषयककार्याणामेवोल्लेखः। यदा अर्जुनः स्वजनान् दृष्ट्वा युद्वक्षेत्रे कथयति 'न योत्स्ये', तदा श्रीकृष्णः तं स्वकर्म प्रति प्रेरितुं नियोक्तुं तस्य 'भावुकतां च नियन्त्रयितुं तमुपदिशति।

पञ्चतन्त्रस्य अपरीक्षितकारकतन्त्रम्-

पञ्चतन्त्रस्य अस्मिन् तन्त्रे एतत् उपदिष्टम् यत् जनः न कदापि लोभवशात् भूत्वा कार्यं कुर्यात् यतोहि रजोगुणप्रधानलोभेन मानवः विवेकहीनः सञ्जातः। अतः क्षपणककथामाध्यमेन पं. विष्णुशर्मणा कथितम् यत्-

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम्।[7]
तन्नरेण न कर्तव्यं नापितेनात्रयत्कृतम्।।

वस्तुतः नापितः मणिभद्रश्रेष्ठिनमनुकृत्य लोभवशात् क्षपणकानाम् अविचार्य एव वधं करोति। नकुलं हन्तारं मत्वा कुपिता ब्राह्मणी तमेव नाशयति। अत्रापि आत्मप्रबन्धनस्य अभावः दृश्यते। यदि ब्राह्मणी रजोगुणं विहाय सत्त्वगुणेन शान्तचित्तेन विचारमकरिष्यत् तदा सा कदापि न नकुलस्य वधं अकरिष्यत्। अत एव उपदिष्टम्-

अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम्।[8]
पश्चात् भवति सन्तापो ब्राह्मण्या नकुले यथा।। 171 ।।

लोभाविष्टचक्रधरकथायाम् अतिलोभस्य दुष्परिणामानिदर्शितानि। चतुर्षुमित्रेषु चतुर्थः तामं्र, रजतं सुवर्णं विहाय अतिलोभवशात् मित्रवचनं न श्रृणोति। अतएव तस्य मस्तके चक्रं भ्रमति।-

आत्मप्रबन्धनहेतोः काम-क्रोध-मद-लोभ इत्येषानां परित्यागः कर्तव्यः, यतो एते नरकपन्थानः। इन्द्रियनिग्रहः तु आत्मप्रबन्धनस्य प्रथमः सोपानः। एते कामक्रोधादयः तु इन्द्रियनिग्रहे बाधकाः। अपरीक्षित-कारकतन्त्रस्य क्षपणककथायां नापितः कामवशात् दुष्करं करोति, ब्राह्मणीनकुलकथायां ब्राह्मणी क्रोधवशात् पुत्रवत् नकुलं हन्ति। लोभाविष्टचक्रधरकथायां चतुर्थमित्रम् लोभवशात् विपन्नः भवति।

सिंहकारकः मूर्खब्राह्मणकथा, मूर्खपण्डित कथा च एतयोः माध्यमेन एतत् उपदिष्टम् यत् ज्ञानाहंकारः कथं नाशयति। यदि जनः व्यवहारकुशलः तर्हि एव

स समाजे प्रतिष्ठां लभते यदि ज्ञानमदेन विवेहकीनः तर्हि स विनश्यति उक्तम् च-

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिसत्तमा।[9]
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः।।

अपि च जनेभ्यः केवलं पुस्तकीयज्ञानं न पर्याप्तम् लोकव्यवहारमपि अपेक्षितम् अन्यथा समाजे उपहास्यतां यान्ति-
अपि शास्त्रेषु कुशला लोकाचारविवर्जिता।[10]
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः।। 38।।
इन्द्रियनिग्रहानन्तरं मनोनिग्रहः आत्मप्रबन्धनाय आवश्यकम्। निश्चयात्मिका बुद्धिः एव मनोनिग्रहे समर्था। मत्स्य मण्डूक कथायां एकबुद्धिः मत्स्यः विमले जले क्रीडति शतबुद्धिः सहस्रबुद्धिस्तु नश्यतः-

शतबुद्धिः शिरस्थोऽयं लम्बते च सहस्रधीः।[11]
एकबुद्धिरहं भद्रे! क्रीडामि विमले जले।।
श्रीमदभगवत्गीतायामपि श्रीकृष्णः उपदिशति-
व्यवसायात्मिका बुद्धिरेकेह कुरूनन्दन।[12]
बहुशाखा ह्यनन्ताश्च बुद्धायोऽव्यवसायिनाम्।। (2/41)
मनोनिग्रहार्थं इन्द्रियनिग्रहः कर्तव्यः यतो हि-
यततो हययपि कौन्तेय पुरूषस्य विपश्चितः।[13]
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।।

सोमशर्मपितृकथायाम् अनागतविपत्तेः चिन्तितस्य जनस्योपहासः कृतः। वस्तुतः मानवः अनागतानां विषयाणां चिन्तया दुःखितः भवति। अनन्तरं सः सत्तूसंग्रहीसोमशर्मणः पिता इव शोकाकुलः भवति। अर्जुनः अपि कुरूक्षेत्रे स्वजनानां वधस्य विषये चिन्तयित्वा स्वकर्तव्यात् विमुखः भवति। सोऽपि अनागतविषये चिन्तयति तदा श्रीकृष्णः तमुपदिशति-

क्लैब्यं मा स्म गमः पार्थ-
नैतत्त्वय्युपपद्यते।[14]
क्षुद्रं हृदय दौर्बल्यं त्यक्त्वोनित्तष्ठ परंतप।। (2/3)

अर्जुनस्य मानसिकद्वन्द्वस्य कारणमेतदेव यत् स रणक्षेत्रे स्थित्वा बन्धुबान्धवान् प्रति रागमोहयुक्त्वा तेषां मरणस्य विषये शोकाकुलः भवति। अत्र मनोनिग्रहेण एव आत्मप्रबन्धनस्य महती आवश्यकता इति विचार्य श्रीकृष्णः तमुपदिशति। सोमशर्म-पितृकथामाध्यमेनापि एतदेव उपदिष्टम्-

अनागतवतीं चिन्तामसम्भाव्यां करोति यः।[15]
स एव पाण्डुरः शेते सोमशर्म पिता यथा।। (67)

परन्तु अस्य समाधानं केवलं आत्मप्रबन्धनमेव। चन्द्रभूपतिकथा शिक्षयति यत् परिणाममविचार्य अतिलोभात् कस्यचित् अविश्वसनीयस्य सहसा विश्वासः न कर्तव्यः। नीतिकुशलः एकेन साधनेन अनेकानि कार्याणि साधयति। वानराणां नीतिकुशलः नेता रत्नमालां प्राप्तवान्, राक्षसेण मैत्रीमकरोत् स्वकुलघातकनृपात् प्रतिशोधञ्च गृहीतवान्, अपि च नृपं जीवितं विहाय स्वामीभक्तिं प्रदर्शय तं दुःखानुभवमपि कारितवान्। एषा एवास्ति वानरस्य प्रतिशोधभावना-

यो लौल्यात् कुरूत कर्म नैवोदर्कमवेक्षते।[16]
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः।।(68)

एतासु सर्वासु कथासु वर्णितमिदं यत् जीवने साफल्यं तदैव संभवम् यदि मानवः अभ्यासवैराग्यसाधनाभ्याम् इन्द्रियनिग्रहं मनोनिग्रहं च कृत्वा आत्मप्रबन्धितः स्यात्।

**वर्तमानराजनीतेः संदर्भे समन्वयम्**

सर फ्रेडरिक पोलकमहोदयानुसारं राजनीतेः विभागद्वयम्- सैद्धान्तिक राजनीतिः व्यवहारिक राजनीतिश्च। वर्तमानराजनीत्यां नेतृणाम् व्यवहारं दृष्ट्वा इदं प्रतीयते यत् आत्मप्रबन्धनम् तेषां कृते अत्यनिवार्यम् यतो हि अद्यत्वे राजनैतिक दशा सम्पूर्णे भूमण्डले दयनीया। सर्वे स्वार्थीभूत्वा यत्किञ्चित् अपि कर्तुं प्रयतते। अत्र व्यवहारिक राजनीतेः संदर्भे आत्मप्रबन्धनस्य भूमिकाविषये विवेचनं कृतम्। वर्तमान राजनीतेः सन्दर्भे सी.एल. वेपर महोदयस्य कथनमिदं समीचीनम्, तेन कथितम् प्लेटो महोदयस्य विश्लेषणमेतदस्ति- The root cause, then, of men's troubles is that they are led by ignorant men, who pretend to knowledge, but who are, in fact, as ignorant as themselves. They are red by those who do not know where they are going. At best these leaders name formed opinions about things, which not surprisingly are not round. They are like sailors on a ship, who argue about their course and clamor to be steersman, while the true navigator is bound to the mast and called useless stargazing fool. This is the predicament of men, that they constantly mistake their good and that their mistakes to uncorrected and are even made worse by their leaders.[17] (C.L. Wayper, Political Through, English University press Ltd. London 1964 p. 17).

कठोपनिषदि अपि "अन्धेनैव नीयमानाः यथान्धाः" इत्युक्तम्।[18] एतदर्थमात्मप्रबन्धनमतीव महत्त्वपूर्णम्। अपरीक्षितकारकतन्त्रे पं. विष्णुशर्मणा यत् काम-क्रोध-मद-लोभादि विषये राजकुमारान् उद्बोधितम् तस्योद्देश्यमेतदेव यत् ते कुशलराजनीतिज्ञाः भवेयुः। अद्यत्वे तु नेतारः परस्परं ईर्ष्याद्वेषभावग्रसिताः। तेषां तु वाक्नियंत्रणमपि न। परस्परं वाक्युद्धेन अशान्तिमयं वातावरणं कुर्वन्ति। श्रीमद्भगवत्गीतायां त्रिविधतपानामोल्लेखः। तेषु वाङ्मयतपो अन्यतमः। एतत् तपः स एव कर्तुं शक्नोति यः जितेन्द्रियः स्यात्। सत्वगुणी आत्मप्रबन्धितः एव समर्थः, यतोहि वाङ्मयतपः एवमेव अस्ति-

अनुद्वेगकरं वाक्यं प्रियहितं च यत्।[19]
स्वाध्यायाम्यसनं चैव वाङ्मयं तप उच्यते।।

वर्तमानराजनीत्यां तु विपरीतमाचरणं वर्तते नेतृणाम् सदैव परस्परं क्लेशः, शत्रुता च। स्वस्थराजनीत्यै तु परस्परं सौहार्दम् अपेक्षितम्। पं. विष्णुशर्मणा कथितम्-

कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदयम्।[20]
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्।। (71 अपरीक्षित0)

मर्यादापुरूषोत्तम श्रीरामः जितेन्द्रियः राजा आसीत्। प्रजारञ्जनमेव तस्य प्रधानोद्देश्यः अतएव तेन कथितम्-

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।[21]
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।। उत्तररामचरितम् (1/12)

एतादृशी एव भावना वर्तमानयुगे अस्माकं नेतृणाम् भवितव्या। रामराज्य कल्पना तु तदैव सार्थकी भविष्यति यदि नेतारः रामवत् मर्यादितः आत्मप्रबन्धितः च भूत्वा केवलं राष्ट्रहिताय एव आचरेयुः। "तेन यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम्"[22] विचारमिदं तु केवलं इन्द्रियनिग्रहेण एव संभवम्। स्वार्थीभूताः राजानः कदापि राज्यहितं कर्तुं न शक्नुवन्ति। एतदर्थं मनोनिग्रहस्य महती आवश्यकता यतोहि मनः तु चंचलम्। अर्जुनः कथयति-

चंचल हि मनः कृष्ण प्रमाथि-बलवद् दृढ़म्।[23]
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।। (6/30)

श्रीकृष्णः कथयति यत् मनः चलम् तु दुर्निग्रहम्। परं अभ्यासेन वैराग्येण च ग्रहीतुं शक्यते-

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।[24]
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।। (6/35)

वस्तुतः मानवस्य चित्तवृत्तयः एव आत्मप्रबन्धने बाधकाः। अतः अभ्यासवैराग्याभ्यामेव तेषां निरोधः करणीयः। योगदर्शनेऽपि वर्णितम्- "अभ्यास-

**वैराग्याभ्यां तन्निरोधः" 25 प्रो. बार्कर महोदयेन शिक्षाविषये यत् कथितं तदपि आत्मप्रबनधनस्य एव संकेतितम् तेनोक्तम्-** It (Education) should always bring lessons of courage to the spirit. It should always carry to the ears of reason whispers of that ultimate good, which it will one day know its fullness. – Earnest Barker OP-Cit. P. 222

**आचार्य कैटिल्येन अर्थशास्त्रस्य इन्द्रियजयनाम्नः षष्ठाध्यायेऽपि कथितम् यत् अनेके राजानः कामक्रोधमदलोभादि शत्रुषड्वर्गमाश्रित्य एतेषां च वशीभूत्वा बान्धवैः राष्ट्रेण च सह नष्टाः-**

> **"एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः।[26]**
> **सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रियाः।।**
> **(14) प्रथम अधिकरण षष्ठ अध्याय, प्रकरण 3**

**अपि च इमं शत्रुवर्गमुत्सृज्य जितेन्द्रियः जमदग्निपुत्रपरशुरामः, अम्बरीषः, नाभागः च सुचिरं निष्कण्टकं राज्यं उपभुक्तवन्तः-**

> **शत्रुषड्वर्गमुत्सृज्सृज्य जामदग्न्यो जितेन्द्रिय।[27]**
> **अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्।।15।। (प्रथम अधिकरण षष्ठ अध्याय, प्रकरण 3)**

> **अतएव कौटिल्येन कथितम्-**
> **विद्या विनयहेतुरिन्द्रयजयः कामक्रोधलोभमानमदहर्षत्यागात् कार्यः।। 1।। [28]**
> **कृत्स्न हि शास्त्रमिदमिन्द्रयजयः।।4।।[29]**
> **तद्विरूद्धवृत्तिवश्येन्द्रियश्चातुरन्तोऽपि राजा सद्यो विनश्यति।।5।।**

**एवं इन्द्रियनिग्रहः तु आत्मप्रबन्धनस्य प्रथमसोपानः एव।**

**अर्थशास्त्रस्य विनयाधिकारिकनामाधिकरणे राजर्षे व्यवहारविषये कौटिल्य कथयति यत्-**

> **"एवं वश्येन्द्रियः परस्त्रीद्रव्यहिंसाश्च वर्जयेत्[30] ।।3।।**
> **स्वप्नं लौल्यमनृतमुद्धतवेषत्वमनर्थसंयोगं च[31] ।।4।।**
> **अधर्मसंयुक्तं चानर्थसंयुक्तं च व्यवहारम्[32] ।।5।।**
> **अस्याभिप्रायः यत् राजा तु आत्मप्रबन्धितः भूत्वा एव राजकार्य सुचारूरूपेण कर्तुं शक्नोति।**

**निष्कर्षतः आत्मप्रबन्धनं राजनीतिक्षेत्रे अतीव महत्त्वपूर्णम्। अपरीक्षितकारकतन्त्रे कामक्रोध मदलोभविषयककथासु एतत् एव शिक्षितं यत् एते तु सर्वे विनाशकारकाः। राजकुमाराः स्वजीवने एतान् विहाय एव राजनीत्यां सफलशासकाः भवितुं अर्हन्ति। एतेषां त्यागेन एव आत्मप्रबन्धनं भवति। यथा श्रीकृष्णस्य उपदेशं श्रुत्वा रागमोहविरहितः आत्मप्रबन्धितः अर्जुनः कथयति-**

> **नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।[33]**
>
> **स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव।। (18/73)**

**एवमेव अपरीक्षितकारकतन्त्रं पठित्वा सर्वे वयं अज्ञानान्धकारात् निर्गत्य ज्ञानप्रकाशे स्थित्वा आत्मप्रबन्धनेन एव सम्पूर्णे जीवने शान्तिं सुखं च प्राप्तुं शक्नुमः। अतः यदि नेतारः राष्ट्रस्वामिनश्चापि अस्यपालनं कुर्युः तर्हि अवश्यमेव राष्ट्रं शान्तिसुखमुपनतं भवेत्।**

### सन्दर्भा


1. **व्यावसायिक संगठन एवं प्रबन्ध** (Business organization and management) **जोशी एवं जोशी, पृ0 529, 2003-2004, संशोधित संस्करण महावीर बुक डिपो, नई सड़क, दिल्ली**
2. **Ibid पृ0 529**
3. **Ibid पृ0 530**

4. Ibid पृ0 530
5. Ibid पृ0 535
6. Ibid पृ0 533
7. पञ्चतन्त्रम्-(अपरीक्षितकारक) श्री विष्णु शर्मा चैखम्बा सुरभारती प्रकाशन वाराणसी सम्पादक- डा. श्रीकृष्णमणि त्रिपाठी, 2004
8. Ibid पृ0 19
9. Ibid पृ0 40
10. Ibid पृ0 44
11. Ibid पृ0 55
12. श्रीमद्भगवद्गीता 2/41
13. श्रीमद्भगवद्गीता 2/60
14. श्रीमद्भगवद्गीता 2/3
15. पञ्चतन्त्रम्- (अपरीक्षितकारकम्) श्री विष्णु शर्मा, चैखम्बा सुरभारती प्रकाशन वाराणसी सम्पादक- डा. श्रीकृष्णमणि त्रिपाठी, पृ0 474
16. Ibid पृ0 77
17. प्रतिनिधि राजनीतिक विचारक- डा. इकबाल नारायण, ग्रन्थ विकास प्रकाशन, जयपुर, 2001, पृ0 6
18. कठोपनिषद्
19. श्रीमद्भगवद्गीता (17/15)
20. पञ्चतन्त्र (अपरीक्षितकारक तन्त्र) श्री विष्णु शर्मा, चैखम्बा सुरभारती प्रकाशन वाराणसी सम्पादक- डा. श्रीकृष्णमणि त्रिपाठी, पृ0 80
21. उत्तररामचरितम् (भवभूति)
22. ईशावास्योपनिषद् (1 मन्त्र)
23. श्रीमद्भगवद्गीता,- गीता प्रेस गोरखपुर
24. Ibid
25. महर्षि पतञ्जलिमुनि प्रणीतम्, पातञ्जलयोग दर्शनम् व्याख्याकार- डा. सुरेशचन्द्र श्रीवास्तव्य शास्त्री चैखम्बा सुरभारती प्रकाशन वाराणसी, 2006
26. कौटिल्य अर्थशास्त्र, व्याख्याकार- उदयवीर शास्त्री, मेहरचन्द लछमनदास पब्लिकेशंस, नई दिल्ली, 2009, पृ0 13
27. Ibid पृ0 13
28. Ibid पृ0 12
29. Ibid पृ0 12
30. Ibid पृ0 14
31. Ibid पृ0 14
32. Ibid पृ0 14
33. श्रीमद्भगवद्गीता गीता प्रेस, गोरखपुर